॥ वाल्मीकि रामायण॥

१ बालकाण्ड

अध्याय ४२

देवदेवे गते तस्मिन्सोऽङ्गुष्ठाग्रनिपीडिताम् ।
कृत्वा वसुमतीं राम संवत्सरमुपासत ॥ १॥

अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः ।
उमापतिः पशुपती राजानमिदमब्रवीत् ॥ २॥

प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियम् ।
शिरसा धारयिष्यामि शैलराजसुताम् अहम् ॥ ३॥

ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता ।
तदा सातिमहद्रूपं कृत्वा वेगं च दुःसहम् ।
आकाशादपतद्राम शिवे शिवशिरस्युत ॥ ४॥

नैव सा निर्गमं लेखे जटामण्डलमोहिता ।
तत्रैवाबभ्रमद्देवी संवत्सरगणान्बहून् ॥ ५॥

अनेन तोषितश्चासीदत्यर्थं रघुनन्दन ।
विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति ॥ ६॥

गगनाच्छङ्करशिरस्ततो धरणिमागता ।
व्यसर्पत जलं तत्र तीव्रशब्दपुरस्कृतम् ॥ ७॥

ततो देवर्षिगन्धर्वा यक्षाः सिद्धगणास्तथा ।
व्यलोकयन्त ते तत्र गगनाद्गां गतां तदा ॥ ८॥

विमानैर्नगराकारैर्हयैर्गजवरैस्तथा ।
पारिप्लवगताश्चापि देवतास्तत्र विष्ठिताः ॥ ९॥

तदद्भुततमं लोके गङ्गा पतनमुत्तमम् ।
दिदृक्षवो देवगणाः समेयुरमितौजसः ॥ १०॥

सम्पतद्भिः सुरगणैस्तेषां चाभरणौजसा ।
शतादित्यमिवाभाति गगनं गततोयदम् ॥ ११॥

शिंशुमारोरगगणैर्मीनैरपि च चञ्चलैः ।
विद्युद्भिरिव विक्षिप्तैराकाशमभवत्तदा ॥ १२॥

पाण्डुरैः सलिलोत्पीडैः कीर्यमाणैः सहस्रधा ।
शारदाभ्रैरिवाक्रीत्णं गगनं हंससम्प्लवैः ॥ १३॥

क्व चिद्द्रुततरं याति कुटिलं क्व चिदायतम् ।
विनतं क्व चिदुद्भूतं क्व चिद्याति शनैः शनैः ॥ १४॥

सलिलेनैव सलिलं क्व चिदभ्याहतं पुनः ।
मुहुरूर्ध्वपथं गत्वा पपात वसुधां पुनः ॥ १५॥

तच्छङ्करशिरोभ्रष्टं भ्रष्टं भूमितले पुनः ।
व्यरोचत तदा तोयं निर्मलं गतकल्मषम् ॥ १६॥

तत्रर्षिगणगन्धर्वा वसुधातलवासिनः ।
भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः ॥ १७॥

शापात्प्रपतिता ये च गगनाद्वसुधातलम् ।
कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः ॥ १८॥

धूपपापाः पुनस्तेन तोयेनाथ सुभास्वता ।
पुनराकाशमाविश्य स्वाँल्लोकान्प्रतिपेदिरे ॥ १९॥

मुमुदे मुदितो लोकस्तेन तोयेन भास्वता ।
कृताभिषेको गङ्गायां बभूव विगतक्रमः ॥ २०॥

भगीरथोऽपि राजर्षिर्दिव्यं स्यन्दनमास्थितः ।
प्रायादग्रे महातेजास्तं गङ्गा पृष्ठतोऽन्वगात् ॥ २१॥

देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ।
गन्धर्वयक्षप्रवराः सकिंनरमहोरगाः ॥ २२॥

सर्वाश्चाप्सरसो राम भगीरथरथानुगाः ।
गङ्गामन्वगमन्प्रीताः सर्वे जलचराश् च ये ॥ २३॥

यतो भगीरथो राजा ततो गङ्गा यशस्विनी ।
जगाम सरितां श्रेष्ठा सर्वपापविनाशिनी ॥ २४॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com